**COHERENCE** – The Multidisciplinary Research Journal
Volume No: 15, Issue No: 2, Year: 2024 (July-December)
PP: 111-114

ISSN: 0976-5301
Peer Reviewed & Refereed Journal (IF: 7.85)
Journal Website www.coherencejournal.in

# संस्कृतवाङ्मये व्याकरणस्य महत्त्वम्

**डॉ. बद्री नारायण चौधरी**
ग्राम+पो.– सहसराम, थाना बबरौल, जिला– दरभंगा

**सारांश**

संस्कृतवाङ्मये व्याकरणस्य स्थानं सर्वाधिकं महत्त्वपूर्णम् अस्ति। व्याकरणं वेदाङ्गेषु प्रमुखं वेदाङ्गं मन्यते, यतः तदेव भाषायाः शुद्धतां, सुसम्बद्धतां तथा अर्थबोधस्य स्पष्टतां च सुनिश्चितं करोति। संस्कृतभाषा विश्वस्य प्राचीनतमासु वैज्ञानिकभाषासु अन्यतमा अस्ति, तस्याः संरचनात्मकवैशिष्ट्यस्य मूलाधारः व्याकरणमेव अस्ति। महर्षिपाणिनिना विरचितं 'अष्टाध्यायी' इति ग्रन्थं विश्वव्याकरणपरम्परायां अद्वितीयं स्थानं धारयति। तस्य सूत्रपद्धतिः, संक्षिप्तता, वैज्ञानिकता च अद्यापि भाषाविज्ञानक्षेत्रे आदर्शरूपेण स्वीकृता अस्ति। संस्कृतवाङ्मये वेदाः, उपनिषदः, रामायणम्, महाभारतम्, पुराणानि, काव्यग्रन्थाः, नाटकानि, दर्शनग्रन्थाश्च व्याकरणस्य आधारभूतसिद्धान्ताणाम् अनुसरणेन रचिताः सन्ति। व्याकरणस्य ज्ञानं विना एतेषां ग्रन्थानां यथार्थार्थबोधः कठिनो भवति। शब्दरूपाणां, धातुरूपाणां, समासां, प्रत्ययानां, सन्धीनां तथा कारकाणां यथावद्ज्ञानं व्याकरणाध्ययनेनैव सम्भवति। व्याकरणं केवलं भाषाशुद्धेः साधनं नास्ति, अपितु चिन्तनप्रक्रियायाः परिष्कारकं साधनमपि अस्ति। व्याकरणाध्ययनं विद्यार्थ्यानां तर्कशक्तिं, विश्लेषणक्षमतां, भाषिकदक्षतां च वर्धयति। संस्कृतसाहित्यस्य संरक्षणे, संवर्धने तथा प्रचारे व्याकरणस्य योगदानं अनुपमेयम् अस्ति। संस्कृतवाङ्मयस्य गूढार्थानां उद्घाटनं, पाठभेदाणां निराकरणं तथा भाषिकपरम्परायाः संरक्षणं व्याकरणस्य साहाय्येनैव भवति। अतः स्पष्टं भवति यत् संस्कृतवाङ्मये व्याकरणं न केवलं भाषायाः मेरुदण्डः अस्ति, अपितु सम्पूर्णस्य संस्कृतसाहित्यस्य आधारस्तम्भोऽपि वर्तते। तस्य अध्ययनं संस्कृतभाषायाः सम्यग्ज्ञानाय, साहित्यस्य यथार्थबोधाय तथा भारतीयज्ञानपरम्परायाः संरक्षणाय अत्यावश्यकम् अस्ति।

**भूमिकाः**

**तद् द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।**
**पवित्रं सर्वविद्यानामधि विद्यं प्रकाशते॥**[1]

विश्वस्य प्रसिद्धासु विविध-भाषासु संस्कृतस्य सर्वोपजीव्यत्वमिति वैज्ञानिकैः प्रतिपादितम्। अस्याः भाषायाः पदानि सुसंस्कृतानि विपुलं वाङ्मयं संसृजन्तीति यथार्थ नाम संस्कृतमिति नाम प्रसिद्धम्। तत्र साधुत्वेन गम्यमानानां संस्कृतपदानाखण्डतयाऽनादिकालतः परिनिष्ठतस्तत्त्वं स्वीक्रियते वैयाकरणशिरोमणिभिः। लौकिक-वैदिकभेदेन संस्कृतशब्दाः सामान्यतः द्वैविध्यं भजन्ते। तत्र लौकिकाः लोके वेदे च व्यवहृताः भवन्ति। वैदिकास्तु वेदमात्रे प्रयुक्ताः कथ्यन्ते। उभयविधानामपि शब्दानां प्रकृति-प्रत्ययादि-कल्प नया लघुभूतेन मार्गेण अनुशासनमर्थात् असंस्कृतेभ्यः शब्देभ्यः पृथक्कृत्य साधुत्वबोधनद्वारा शब्दबोधनिर्देष्टु–प्रक्रियाबलेन मोक्षोपयोगि ब्रह्मत्वज्ञानं शब्दब्रह्म स्वरूपबोधश्च प्रयोजनं भवति।

इत्थं ईदृषे महत्वपूर्णोपलक्ष्ये संस्कृतस्य अनादिकलात् शब्दानुशासन-विधयः विभिन्नैराचार्यैः महर्षिभिश्च सप्रयासाः प्रारब्धाः। तत्र कालक्रमेण यानि व्याकरणानि यैः आचार्यैः प्रणीतानि तेषां नामानि सुप्रसिद्धान्येव। तथा हि–

**ऐन्द्रश्चान्द्रः काशकृत्स्नापिशली शाकटायनः।**

**पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादशाब्दिकाः॥**

एतानि च व्याकरणानि स्वसमकालिकसंस्कृत–साहित्यमुपजीव्य लक्ष्यैक–चक्षुष्कैराचार्यैः स्वनाम्नैव प्रख्यापितानि।

व्याक्रियन्ते– व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणम्। इदमेव शब्दान्तरेण शब्दानुशासनमपि प्रोच्यते। अनुशिष्यते असाधुशब्देभ्यो विविच्य साधुशब्दाः पृथक्क्रियन्ते अनुशासनम् तत् हि शब्दानां लौकिकानां वैदिकानां विधानामनुशासनमिति शब्दानुशासनम्।


© Copyright @ Authors

शब्दानुशासनमिति नामकरणं प्रप्रथमं भगवता–पतञ्जलिना प्रतिपादितम्, यथा ‘अथ शब्दानुशासनम्’ अथैत्ययं शब्दोऽधिकाराथः प्रयुक्त्यते। शब्दानुशासनं नाम शास्त्र–मधिकृतं वेदितव्यम्। अस्मिन् शास्त्रे शब्दानां प्रकृतिप्रत्यय–विभाजनं विधाय साधु तया तद्व्युत्पादनप्रकारः अर्थानुसंधानप्रकारश्च प्रदर्शितः। उक्तं हि– “न केवला प्रकृतिः प्रयोक्तव्या न केवलं प्रत्ययः”[3] अथवा “अपदं न प्रयुञ्जीत”[4] अर्थात् प्रकृतिप्रत्ययौ समुदितौ हि शब्दं वदत्तौ प्रयोगाईतौ च लभ्येते।

भगवान पाणिनेः सूत्रमिदम् ‘सुप्तिङन्तं पदम्’[5] अयं निष्कर्षः– सुप्प्रत्ययान्तः तिङप्रत्ययान्तश्च शब्दः पदम्। वेदस्य शिक्षादि षडङ्गाणि भवन्ति। तेष्वन्यतमं व्याकरणमुच्यते। 'शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्'[6] यथा शरीरस्य सर्वावयवेषु मुखस्य स्थानं मुख्यं भवति तथैव वेदाङ्गेषु समेषु मुखमिव प्रधानमङ्ग व्याकरणं भवति।

अस्य महत्त्वम्– व्याकरणस्य महत्त्वं यथा लोके तथैव वेदे। व्याकरणाध्ययनमन्तरेण कस्मिन्नपि शास्त्रे पुंसां प्रवृत्तिरेव न स्यात्। अतः सर्वैरेव प्राचीनार्वाचीनैः विद्वद्भिः व्याकरणशास्त्रस्य महत्त्वं मुक्तकण्ठेन समुद्घाटितम्। उक्तं निरुक्तकारेण आचार्ययास्केनापि इदमन्तरेण मन्त्रेषु अर्थप्रत्ययो न विद्यते अर्थात् अर्थज्ञानं विना निरर्थकाः मन्त्राः, मन्त्रज्ञानं विना किं वेदः। वेदस्य मन्त्र-ब्राह्मणात्मक-शब्दराशिरस्तीति पतञ्जलिना प्रोक्तं। तद्यथा- “रक्षार्थ वेदानामध्येयं व्याकरणम्। षडङ्गेषु प्रधानं व्याकरणम्, प्रधाने च कृतो यत्नः फलवान् भवति।”[7]

भास्कराचार्येणोक्तम्-

**यो वेद वेदवदनं सदनं हि सम्यक्**
**ब्राह्मण्याः सवेदमपि वेद किमन्यशास्त्रम्।**
**यस्मादतः प्रथममेतदधीत्य धीमान्**
**शास्त्रान्तरस्य भवति श्रवणेऽधिकारी ॥[8]**

किञ्च-

**यद्यपि बहुनाधीषे तथापि पठ पुत्र व्याकरणम्।**
**स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत्॥**

किम्बहुना उच्यते- 'विना व्याकरणेन अन्धः, मूकः, तर्कविवर्जितः' व्याकरणं विना वेदाना मर्थबोधो न संभवदर्थबोधं विना निष्फलो वेदपाठः। उक्तं निरुक्तकृता- स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थान्।

**योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमैति ज्ञानविधूत पात्मा॥[9]**
**यदधीतमविज्ञातं निगदेनैव शब्द्यते।**
**अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्॥[10]**

तस्मादेव व्याकरणप्रयोजनानि भाष्यकृता प्रोक्तानि –

**यस्तु प्रयुङ्क्ते कुशलो विशेषे, शब्दानान्यथावद् व्यवहारकाले।**
**सोऽनन्त माप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः॥[11]**

अयमाशयः - व्याकरणज्ञानद्वारैव ऐहलौकिकाभ्युदयं पारलौकिकमानन्दञ्च भजन्ति खलु मानवाः। अस्य प्राचीनत्वं व्याकरणस्य वेदमूलकतया प्रधानायवतया सकलेष्टसाधनप्राप्तिकारणं तथाच वेदवदेव अस्याति-पुरातनता-स्वभावः-सिध्यति। अस्मिन् विषये ऐतिहासिकम् अनुसंधानपरं विविध-प्राचीनार्वाचीन-प्रथितं प्रेक्षावतां समुल्लेखेऽपि प्रामाण्यबाहुल्यं प्राप्यते। परमेश्वर-प्रतिपादितो हि वेद इति स्वीक्रियते मनीषिभिः।

अतएव तन्मूलकतया शब्दशास्त्रमपि केनापि देवमूर्त्तिनैव प्रणीतं भवेदिति मन्तव्यम्। वेदेषु खलु शब्दशास्त्रीय-पारिभाषिकशब्दाः बहुलतया समुपलभ्यन्ते। अथर्ववेदेऽपि को धातुः? कः प्रत्ययः? किम्प्रातिपदिकम्? इति जिज्ञासया पारिभाषिक शब्दानां दर्शनं भवति अतः इदं सिध्यति यत् प्रकृति-प्रत्यय-विभागः व्याकरणस्य न कोऽपि नवीनो विषयः। व्याकरणशास्त्रस्य सारस्वत्-परम्परया ऐतिहासिक ग्रन्थानामन्वेषणेन शास्त्रचर्चया विविध प्रमाणैश्च जिगमिषते यत् प्रथमः प्रवर्तकः इन्द्र आसीत्। कैश्चन कथ्यते व्याकरणशास्त्रम् नाम किमपि पृथक् पुराणमासीत्। सर्वतः प्रथमं प्रतिपादित शब्दानां पारायणं भवतिस्म। ततो देवैः प्रार्थितः इन्द्रः सर्वशास्त्र प्रणीतवान्। अतः एव ऐन्द्रनामकं व्याकरणं सर्वतः प्रप्रथमं


© Copyright @ Authors

ISSN: 0976-5301
Peer Reviewed & Refereed Journal (IF: 7.85)
Journal Website www.coherencejournal.in

समुद्भूतमिति विषये साक्ष्यमपि समुपलभ्यते। तद्यथा- 'इन्द्रोऽध्येता बृहस्पतिश्च प्रवक्ता दिव्ययुगवर्षसहस्रमध्ययनकालः तथापि नान्तं जगाम।' इति।

यद्यपि प्रत्येकं कृते पृथक् पृथक् प्रातिशाख्यं वर्तते तथापि तत्र मन्त्राणामेव केवलमुच्चारण-स्वरयोः प्रतिपादकत्वेन प्रकृति-प्रत्ययानां विभाग- विधानात् शब्दसाधुत्वसाधनविधिज्ञानाभावेन च न तत् पृथक् वेदाङ्गं व्याकरणम्। अतः ऐन्द्रव्याकरणस्य बहवोऽअनुगामिनोऽजायन्त।

अतएव इन्द्रसम्प्रदायनाम्ना एकः सम्प्रदायः प्रवर्तितः। ततः चान्द्रकाशकृत्स्नप्रभृतयः अनेके सम्प्रदायाः प्रवर्तिताः। सोऽयं नव्यव्याकरणवेत्ता इत्यादिना नव्यव्याकरणसम्प्रदायानां सङ्केतो मिलति।

**ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।**
**सारस्वतं चापिशलं शाकलं पाणिनीयकम् ॥**
**एतेषां व्याकरणसम्प्रदायानां नामानि श्रूयन्ते।**

अस्तु ऐन्द्रादिबहुसम्प्रदायेषु केचन पूर्ववर्तिनः केचन परवर्तिनः। तेषां समग्रतया व्याकरणं नोपलभ्यते, किमपि विलुप्तं किमपि अपूर्णप्रायम्। इत्थं नाधुना तानि व्याकरणानि लोकानां दृष्टिपथे सन्ति। दैवयोगात् तेषु नवीनः पाणिनि- सम्प्रदायः अधुनाऽपि सुष्ठुर्जीवति सम्यक्तया तद् व्याकरणं पल्लवितं पुष्पितं परमोपयोगी वन्दनीयञ्च वर्तते। पाणिनिरपि ईस्वीतः पञ्चषङ्गतात् पूर्वमजनीत्यनुमीयते। सोप्युग्रतपसा शिवस्य प्रसादेन व्याकरणमिदं प्रणीतवान्। तस्य प्रामाण्यं पाणिनि शिक्षायां मिलति-

**येनाक्षरसमाम्नायमधिगम्यमहेश्वरात्।**
**कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥**[12]

पाणिनिना व्याकरणस्य सूत्राणि चतुः सहस्राणि रचितानि, यानि "अष्टाध्यायी"

**नाम्ना विख्यातानि सन्ति।**
**ततः परं कात्यायनेन च वार्तिकानि प्रणीतानि।**

पुनरनन्तरं भगवता पतञ्जलिना तानि सूत्राणि महाभाष्यरूपेण व्याख्यातानि यत् खलु व्याकरणमहाभाष्य नाम्ना सर्वत्र प्रथितमस्ति। अतएव त्रिभिः मुनिभिः प्रवर्तिततत्वात् संबन्धितत्वाच्च त्रिमुनि व्याकरणमिति निगद्यते।

**निष्कर्ष**

उपर्युक्तविवेचनात् निष्पन्नं भवति यत् संस्कृतवाङ्गये व्याकरणस्य महत्त्वम् अत्यधिकं व्यापकं च अस्ति। व्याकरणं भाषायाः शुद्धरूपं संरक्षति, अर्थबोधस्य स्पष्टतां जनयति तथा साहित्यस्य यथार्थव्याख्यानाय मार्गं प्रशस्तं करोति। पाणिनीयव्याकरणपरम्परा संस्कृतभाषायाः वैज्ञानिकस्वरूपस्य प्रत्यक्षं प्रमाणं वर्तते।

वेदादारभ्य आधुनिकसंस्कृतसाहित्यान्तं सर्वत्र व्याकरणस्य प्रभावः दृश्यते। व्याकरणज्ञानं विना न केवलं संस्कृतग्रन्थानां समुचितोऽर्थबोधः सम्भवति, अपितु भाषिकसौन्दर्यस्य आस्वादनमपि पूर्णतया न भवति। व्याकरणं भाषायाः अनुशासनं विधाय तस्याः शुद्धतां, माधुर्यं तथा प्रभावकारितां च वर्धयति।

अद्यतनकाले अपि संस्कृतभाषायाः अध्ययन-अध्यापने, भाषावैज्ञानिकानुसन्धाने, संगणकीयभाषाविज्ञाने तथा भारतीयज्ञानपरम्परायाः संरक्षणे व्याकरणस्य उपयोगिता निरन्तरं वर्धमाना दृश्यते। अतः संस्कृतवाङ्गयस्य समुचिताध्ययनार्थं व्याकरणज्ञानं अनिवार्यं मननीयम्।

अन्ते वक्तुं शक्यते यत् व्याकरणं संस्कृतभाषायाः प्राणतत्त्वम्, संस्कृतवाङ्गयस्य आधारशिला तथा भारतीयबौद्धिकपरम्परायाः अमूल्यं धरोहररूपं शास्त्रम् अस्ति। तस्य संरक्षणं, संवर्धनं तथा व्यापकप्रचारः वर्तमानसमाजस्य महती आवश्यकता वर्तते।


© Copyright @ Authors

**संदर्भ-**

1. वाक्यपदीय, ब्र०का०, 14
2. महाभाष्य पस्पशाह्निकम्
3. महाभाष्यम्
4. महाभाष्यम्
5. अष्टाध्यायी
6. पाणिनीय शिक्षा- 41-42
7. महाभाष्य पस्पशाह्निकम्
8. सिद्धांतशिरोमणि, गोपालाध्याय, मङ्गल श्लोक
9. निरुक्त- 1.18
10. महाभाष्य पस्पशाह्निकम्
11. महाभाष्य पस्पशाह्निकम्
12. पाणिनीय शिक्षा


© Copyright @ Authors